# Shri Lalita Kavacha

# શ્રીલલિતાકવચમ્

## Document Information

Text title : Shri Lalita Kavacham from nAradapurANa

File name : lalitAkavachamnAradapurANa.itx

Category : kavacha, devii, dashamahAvidyA, lalitA, devI

Location : doc_devii

Transliterated by : Radhe Shyam Tiware

Proofread by : Rashmi Sharma, PSA Easwaran psaeaswaran at gmail.com

Source : bRihannAradIyapurANa pUrvabhAge adhyAya 89 v. 23-38

Latest update : May 29, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# શ્રીલલિતાકવચમ્

। નારદપુરાણાન્તર્ગતે ।

સનત્કુમાર ઉવાચ-
અથ તે કવચં દેવ્યા વક્ષ્યે નવરતાત્મકમ્ ।
યેન દેવાસુરનરજયી સ્યાત્સાધકઃ સદા ॥ ૧॥

સર્વતઃ સર્વદાઽઽત્માનં લલિતા પાતુ સર્વગા ।
કામેશી પુરતઃ પાતુ ભગમાલી ત્વનન્તરમ્ ॥ ૨॥

દિશં પાતુ તથા દક્ષપાર્શ્વં મે પાતુ સર્વદા ।
નિત્યક્લિન્નાથ ભેરુણ્ડા દિશં મે પાતુ કૌણપીમ્ ॥ ૩॥

તથૈવ પશ્ચિમં ભાગં રક્ષતાદ્વહ્નિવાસિની ।
મહાવજ્રેશ્વરી નિત્યા વાયવ્યે માં સદાવતુ ॥ ૪॥

વામપાર્શ્વં સદા પાતુ ઇતીમેલરિતા તતઃ ।
માહેશ્વરી દિશં પાતુ ત્વરિતં સિદ્ધદાયિની ॥ ૫॥

પાતુ મામૂર્ધ્વતઃ શશ્વદ્દેવતા કુલસુન્દરી ।
અધો નીલપતાકાખ્યા વિજયા સર્વતશ્ચ મામ્ ॥ ૬॥

કરોતુ મે મઙ્ગલાનિ સર્વદા સર્વમઙ્ગલા ।
દેહેન્દ્રિયમનઃપ્રાણાઞ્જ્વાલામાલિનિવિગ્રહા ॥ ૭॥

પાલયત્વનિશં ચિત્તા ચિત્તં મે સર્વદાવતુ ।
કામાત્ક્રોધાત્તથા લોભાન્મોહાન્માનાન્મદાદપિ ॥ ૮॥

પાપાન્માં સર્વતઃ શોકાત્સઙ્ક્ષયાત્સર્વતઃ સદા ।
અસત્યાત્ક્રૂરચિન્તાતો હિંસાતશ્ચૌરતસ્તથા ।
સ્તૈમિત્યાચ્ચ સદા પાતુ પ્રેરયન્ત્યઃ શુભં પ્રતિ ॥ ૯॥

નિત્યાઃ ષોડશ માં પાતુ ગજારૂઢાઃ સ્વશક્તિભિઃ ।

તથા હયસમારૂઢાઃ પાતુ માં સર્વતઃ સદા ॥ ૧૦॥

સિંહારૂઢાસ્તથા પાતુ પાતુ ઋક્ષગતા અપિ ।
રથારૂઢાશ્ચ માં પાતુ સર્વતઃ સર્વદા રણે ॥ ૧૧॥

તાર્ક્ષ્યારૂઢાશ્ચ માં પાતુ તથા વ્યોમગતાશ્ચ તાઃ ।
ભૂતગાઃ સર્વગાઃ પાતુ પાતુ દેવ્યશ્ચ સર્વદા ॥ ૧૨॥

ભૂતપ્રેતપિશાચાશ્ચ પરકૃત્યાદિકાન્ ગદાન્ ।
દ્રાવયન્તુ સ્વશક્તીનાં ભૂષણૈરાયુધૈર્મમ ॥ ૧૩॥

ગજાશ્વદ્વીપિપઞ્ચાસ્યતાર્ક્ષ્યારૂઢાખિલાયુધાઃ ।
અસઙ્ખ્યાઃ શક્તયો દેવ્યઃ પાતુ માં સર્વતઃ સદા ॥ ૧૪॥

સાયં પ્રાતર્જપન્નિત્યાકવચં સર્વરક્ષકમ્ ।
કદાચિન્નાશુભં પશ્યેત્સર્વદાનન્દમાસ્થિતઃ ॥ ૧૫॥

ઇત્યેતત્કવચં પ્રોક્તં લલિતાયાઃ શુભાવહમ્ ।
યસ્ય સન્ધારણાન્મર્ત્યો નિર્ભયો વિજયી સુખી ॥ ૧૬॥

॥ ઇતિ શ્રીબૃહન્નારદીયપુરાણે પૂર્વભાગે તૃતીયપાદે
બૃહદુપાખ્યાને શ્રીલલિતાકવચં સમ્પૂર્ણમ્ ॥ અધ્યાયઃ ૮૯॥

89th chapter of first part of Naradiyapurana.
Kavacha verses are 23-38.
Encoded by Radhe Shyam Tiware, proofread by Rashmi Sharma
Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Lalita Kavacha*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*